# द्वितीयः पाठः

# क्षितिराद्री भवेत् सदा

## पाठप्रवेशः

पूर्वस्मिन् पाठे वनसंरक्षणस्य प्राधान्यम् अस्माभिरवगतम्। वनपरिपालनम् अकृतं चेत् किं किं भविष्यति ? वायोः जलस्य च संरक्षणे वनं कथं सहायकं भवति इति भवन्तः चिन्तितवन्तः खलु ? वननाशनेन आगोलतापनम्, अनावृष्टिः इत्यादीनि सम्भवन्ति इति सर्वैः ज्ञातम् । अस्य क्लेशं न केवलं मानवाः अपि तु सर्वाणि जीवजालानि अनुभवन्ति। तादृशीम् एकां कथां पठामः।

## आमुखम्

अनावृष्ट्या पीडितानां प्राणिनाम् अवस्थाप्रतिपादिकाः बह्व्यः कथाः साहित्यलोके सन्ति । एतद्विषयिकाः कथाः कैरल्यामपि विद्यन्ते । वैलोप्पिल्लि श्रीधरमेनोन् महाशयेन विरचितायां "जलसेचनम्" इति कवितायामपि एष एव विषयः प्रतिपादितः वर्तते। तस्माद् आशयात् समाकलितोऽयं पाठभागः।



पुष्पफलसमृद्धैः तरुलतादिभिः सम्पन्नो भवति गोवर्धनाचलस्य सानुप्रदेशः। तत्रस्थाः जनाः पशुपालनं, कार्षिकवृत्तिं च कृत्वा जीवनमकुर्वन् । गच्छता कालेन अनावृष्ट्या ग्रीष्मातपेन च सोऽयं प्रदेशो मरुप्रदेशकल्पः संवृत्तः । सर्वाणि जीवजालानि जलाभावेन प्रचण्डातपेन च बहुधा क्लेशान् अन्वभवन् । दिनेषु गतेषु द्वारकातः आगतः बलभद्रः गोकुलवासिनाम् इमाम् अवस्थाम् अन्वपश्यत् । सर्वत्र उष्णवातेन धूलीकलापः प्रसरति । महातरूणां शाखापत्राणि सर्वत्र शुष्काण्यपतन् । उष्णातपेन पीडितानां वत्सानां सशोकम् अम्बारवमपि तस्य कर्णयोः न्यपतत् । एवं गोकुलानाम् एतां दुर्दशां निशम्य सीरपाणेः हृदयं नितरां व्याकुलमभवत् ।

दशामिमां निरीक्ष्य सूरजायाः तीरे स्थितं हलायुधम् उपेत्य केचन गोपालकाः एवमवदन् । "भो बलदेव ! अस्माकं प्रदेशोऽयं जलाभावेन ऊषरा भवति । अत्र जलमिति व्यवहर्त्तुम् इदानीमस्माकं नेत्राम्बुकणमेव शिष्टमस्ति । उन्नतवृक्षाः अपि चण्डांशुकिरणैः शुष्काः जाताः। तर्हि तृणानां कार्यं किमुत? "

एतदाकर्ण्य आश्रितवत्सलस्य हलधरस्य हृदयं कृपार्द्रम् अभवत् । चिन्तामग्नः स कालिन्दीतीरे निषसाद । तस्य मनसि वर्षकालाकाशे नवपयोद इव काचन चिन्ता



प्रादुरभूत् । जलसेचनात् ऋते गोकुलस्य दुरितपरिहरणाय अन्यः उपायः नास्ति । एवं विचिन्तयन् कालिन्दीम् अवदत् । "भोः कलिन्दजे ! अस्तशोभं गोकुलं किं न पश्यसि? हे भूलोकसेविनि! कारुण्यशालिनि! गोलोकवासिनां मुख्यपयस्विनि! त्वत्कारुण्यमेव तृणान्येतानि । तव प्रेम एव अत्र क्षीररूपेण प्रवहति । अतः पुनरपि तव कृपाम् अत्र सर्वत्र प्रसारयतु इति प्रार्थये ।"

हलायुधस्य मधुरोदाराम् इमां वाणीं श्रोतुं विमुखा इव सा स्रोतस्विनी स्वच्छन्दं प्रावहत् । तद् दृष्ट्वा बलभद्रः कोपान्धः अभवत् । सक्रोधं स अवदत् "सर्वेषु जन्तुषु जलाभावेन पीडितेषु सत्सु स्वकीयं शुद्धं जलं वृथा लवणाम्भसि निक्षिपसि किल ? तव गर्वमिदानीं हनिष्यामि" । एवमुक्त्वा सः हलेन बलात् कलिन्दजायाः तीरं विदार्य ततः गोवर्धनपर्यन्तं पयःप्रणालीम् अकरोत् । तेन मार्गेण यमुनाजलं कलकलारवैः सह प्रावहच्च । गोपास्तु जलप्रवाहेन उद्भूतं मृद्गन्धम् आघ्राय आनन्दनर्त्तनं कृत्वा एवं प्रार्थयन्तः ।

"सर्वेषां जीवजालानां सर्वसौभाग्यदायिनी ।
सर्वंसहेयं जननी क्षितिरार्द्रा भवेत्सदा ॥"

## पदच्छेदः

| | | |
|---|---|---|
| सम्पन्नो भवति | - | सम्पन्नः + भवति। |
| शुष्काण्यपतन् | - | शुष्काणि + अपतन्। |
| प्रदेशोऽयम् | - | प्रदेशः + अयम्। |
| एतदाकर्ण्य | - | एतत् + आकर्ण्य। |
| नास्ति | - | न + अस्ति। |
| नवपयोद इव | - | नवपयोदः + इव। |
| तृणान्येतानि | - | तृणानि + एतानि। |
| पुनरपि | - | पुनः + अपि। |
| स हलेन | - | सः + हलेन। |

## विग्रहः

| | | |
|---|---|---|
| मरुप्रदेशकल्पः | - | मरुश्च असौ प्रदेशः मरुप्रदेशः, ईषदूनः मरुप्रदेशः। |
| सशोकम् | - | शोकेन सह वर्तते। (यस्मिन् कर्मणि तद्यथा भवति तथा।) |
| हलधरः | - | धरति इति धरः, हलस्य धरः। |
| हलायुधः | - | हलम् आयुधः यस्य सः। |
| दुर्दशा | - | दुष्टा दशा। |
| सीरपाणिः | - | सीरः पाणौ यस्य सः। |
| नवपयोदः | - | नवश्च असौ पयोदः च। |
| चण्डांशुकिरणैः | - | चण्डाः अंशवः अस्य इति चण्डांशुः, चण्डांशोः किरणाः तैः। |
| भूलोकसेविनी | - | भूलोकस्य सेविनी। |
| कालिन्दी | - | कलिन्दात् प्रभूता। |
| सर्वंसहा | - | सर्वं सहते इति। |
| कोपान्धः | - | कोपेन अन्धः यः सः। |

अम्बारवम् - अम्बा इति रवः तम्।

## कोशः

| | | |
|---|---|---|
| बलभद्रः | - | बलभद्रो प्रलम्बघ्नो कामपालो हलायुधः<br>सङ्कर्षणः सीरपाणिः कालिन्दीभेदनो बलः। |
| कालिन्दी | - | कालिन्दी सूर्यतनया यमुना शमनस्वसा। |
| सीरः | - | सीरस्तु लाङ्गलं गोदारणं हलम्। |
| स्रोतस्विनी | - | सिन्धुः शैवलिनी वहा च ह्रदिनी स्रोतस्वीनी निम्नगा। |
| प्रणाली | - | द्वयोः प्रणाली पयसःपदव्याम्। |
| भूमी | - | सर्वंसहा वसुमती वसुधोर्वी वसुन्धरा। |

# पठनप्रवर्तनानि



**कथां भावानुसारम् अवतारयतु।**

**श्रद्धेयाः अंशाः**

उच्चारणशुद्धिः।
भावात्मकता।
आशयावगमनम्।



**पाठभागात् समानार्थकपदानि चित्वा लिखतु।**

उदा - कालिन्दी – कलिन्दजा, सूरजा।

बलदेवः -

सीरः -

क्षितिः -

दशा -

**श्रद्धेयौ अंशौ**

अर्थावगमनम्।
उचितपदचयनम्।



**अधोदत्तवाक्यानि पठित्वा शतृ-शानजन्तरूपाणि विविच्य लिखतु।**

**उदा -** जनसमूहः प्रकृतिदुरन्तं पश्यन् कम्पमानः अभवत्।

**शतृ - पश्यन्।**

**शानच् - कम्पमानः।**

**क)** मुख्यसचिवः शुभम् आशंसमानः प्रभाषणं कुर्वन् अस्ति।

**ख)** युवजनोत्सवे विजयम् इच्छन् छात्रः नितरां यतमानः अवर्तत।

**ग)** सः गीतं शृण्वन् पचमानः अस्ति।

**घ)** भूस्खलनेन प्रातिवेशिकस्य भवनं भग्नं पश्यन् बालः तपमानः अवर्तत।

**ङ)** शिष्यं पाठयन् अध्यापकः मोदमानः अवर्तत।

**श्रद्धेयौ अंशौ**

अर्थावगमनम्।
उचितपदचयनम्।



**पाठभागात् क्त्वान्त-ल्यबन्त-तुमुन्नन्तानि अव्ययानि चित्वा लिखतु।**

उदा-

| क्त्वान्तम् | ल्यबन्तम् | तुमुन्नन्तम् |
|---|---|---|
| कृत्वा | स्वीकृत्य | व्यवहर्तुम् |

**श्रद्धेयौ अंशौ**

अर्थावगमनम्।
उचितपदचयनम्।



**उदाहरणानुसारं वाक्यं परिवर्तयतु।**

**उदा -** कक्ष्यायां **मोहनः** ऋते सर्वे सन्ति।

कक्ष्यायां **मोहनात्** ऋते सर्वे सन्ति।

**क)** गृहे जनकः ऋते सर्वे सन्ति ।

**ख)** उद्याने पाटलस्य ऋते सर्वाणि पुष्पाणि सन्ति ।

**ग)** आपणात् पटोलेन ऋते सर्वम् आनीतम् ।

**घ)** ग्रन्थालये कुमारसम्भवः ऋते अन्यत् सर्वमस्ति ।

**श्रद्धेयौ अंशौ**

अर्थावगमनम् ।
वाक्यपरिवर्तनसामर्थ्यम् ।

**'तव कारुण्यमेव तृणान्येतानि । तव प्रेम एव क्षीररूपेण प्रवहति' - इति पङ्क्तिं विमृश्य 'नदीनां कालिकप्राधान्यम्' इति विषये चर्चां नयतु ।**

**श्रद्धेयाः अंशाः**

भागभाक्त्वम् ।
अवतरणशैली ।
विषयापग्रथनम् ।

## क्रियापदपरिचयः

**न्यपतत् -** नि उपसर्गपूर्वक पत्लृ गतौ परस्मैपदी लङ् प्र.पु. ए.व ।
न्यपतत् - न्यपतताम् - न्यपतन् ।

**निषसाद -** नि उपसर्गपूर्वक षद्लृ (सद्) विशरणगत्यवसादनेषु परस्मैपदी लिट् प्र.पु. ए.व ।
निषसाद -निषेदतुः - निषेदुः ।

**जायते -** जनी प्रादुर्भावे आत्मनेपदी लट् प्र.पु.ए.व ।
जायते - जायेते - जायन्ते ।

**व्यदारयत् -** वि उपसर्गपूर्वक दॄ हिंसायां (णिचि) परस्पमैपदी लङ् प्र.पु.ए.व ।
व्यदारयत् - व्यदारयताम् - व्यदारयन् ।

**प्रार्थये -** प्र उपसर्गपूर्वक अर्थ याच्ञायाम् आत्मनेपदी लट् उ.पु.ए.व।
प्रार्थये - प्रार्थयावहे - प्रार्थयामहे।

**प्रावहत् -** प्र उपसर्गपूर्वक वह प्रापणे परस्पमैपदी लङ् प्र.पु.ए.व।
प्रावहत् - प्रावहताम् - प्रावहन्।

क्षितिरार्द्रा भवति चेत् सा वृक्षलतादिभिः सुसम्पन्ना भविष्यति। अस्मान् परितः विद्यमानेषु सस्यजालेषु अस्माकं नित्योपयोगक्षमाणां केषाञ्चन सस्यानां नामानि गुणान् च लिखतु।